## अष्टमः पाठः

# गुरुगोविन्दसिंहः



**छात्राः** — आचार्य! नमस्कारः।

**शिक्षकः** — उपविशन्तु सर्वे।

**कुलदीपः** — आर्य! पूर्वं धर्मसंरक्षकाणां वीरपुरुषाणां विवेकानन्दः, शिवाजी, महाराणाप्रतापः इत्यादीनां विषये श्रुतम्, किन्तु गुरुगोविन्दसिंहस्य विषये न जानामि।

**प्रतापः** — महोदय! वयं गुरुगोविन्दसिंहस्य चरित्रं ज्ञातुमिच्छामः।

**विनीता** — श्रीमन्! तस्य चरित्रस्य किं वैशिष्ट्यम्?

**शिक्षकः** — गुरुगोविन्दसिंहस्य शौर्यं, धैर्यं, त्यागः, दूरदृष्टिः, सेवाभावनादिकं विशिष्टम् आसीत्। सः आबाल्यात् जनानां शक्तिं जागरयितुम् आत्मविश्वासेन कार्यं कृतवान्। समाजं संस्कर्तुम्, अखण्डतां स्थापयितुं, धर्मे निष्ठां वर्धितुम् अहर्निशं प्रयत्नं कृतवान्। एषः सिक्खानां धर्मगुरुः आसीत्।

**प्रतापः** — सिक्खाः नाम के?

**शिक्षकः** — सिक्खधर्मानुयायिनः सिक्खाः। यथा जैनधर्मः तथा सिक्खधर्मः। भारते बहवः धर्माः विकासं प्राप्ताः। अतः सर्वे धर्माः समानाः।

**कुलदीपः** — किं गुरुगोविन्दसिंहः सिक्खधर्मस्य प्रवर्तकः?

**शिक्षकः** — गुरुनानकः एव सिक्खधर्मस्य प्रवर्तकः। सः एव तेषां प्रथमः गुरुः आसीत्। गुरुगोविन्दसिंहः तु दशमः अन्तिमश्च गुरुः आसीत्।

— गुरुगोविन्दस्य जननं कदा अभवत्।

**शिक्षकः** — 1666 तमे वर्षे कार्तिक-शुक्ल-सप्तम्यां तस्य जननम् पटनानगरे अभवत् । गुजरी तस्य माता, महात्यागी समाजसेवकः गुरुतेगबहादुरः तस्य पिता आस्ताम्। पिता इव गुरुगोविन्दः अपि समाजसेवानिरतः आसीत्।

**कुलदीपः** — समाजसेवार्थं गुरुगोविन्दः किं कृतवान्?

**शिक्षकः** – तस्मिन् समये भारतीयसंस्कृतेः विनाशकस्य क्रूरस्य मुगलशासकस्य औरङ्गजेबस्य शासनमासीत्। तादृशस्थितौ दुष्टशक्तिं निग्रहितुं प्रजासु धर्मजागरणं कृतवान्। पीड्यमानानां जनानां सङ्घटनं रचितवान्। सामान्यजनानां विचारेषु परिवर्तनमानीतवान् आत्मविश्वासं च जनयितुं प्रोत्साहं दत्तवान्। देशहिताय आत्मरक्षणाय च खड्गं धरन्तु इति आदिष्टवान्।

**प्रतापः** – अधुना अपि सिक्खाः खड्गं धरन्ति वा?

**शिक्षकः** – 'खालसा' दीक्षां स्वीकृत्य न केवलं खड्गम् अपितु पञ्च बाह्यचिह्नानि धर्तुं गुरुगोविन्दः आदिष्टवान्। तानि च केशबन्धनं, कङ्कतिका-स्थापनं, कङ्कणधारणं, कट्यां वस्त्रधारणं, सर्वदा खड्गधारणमिति। एतानि चिह्नानि समर्पणं, परिशुद्धता, दैवभक्तिः, शीलं, शौर्यम्, इत्येतान् भावान् स्मारयन्ति।

**कुलदीपः** – 'खालसा' दीक्षा नाम किम्?

**शिक्षकः** – 'खालसा' नाम ईश्वरीयदीक्षा। ईश्वरस्य निश्चल-आराधने एव तीर्थयात्रा, दानं, दया, तपः, संयमनञ्च अस्तीति यः भावयति यस्य हृदये पूर्णज्योतिषः प्रकाशोऽस्ति सः एव खालसा भवति।

**विनीता** – पुनरपि कथं समाजं प्रेरितवान्?

**शिक्षकः** – गुरुगोविन्दसिंहः वीररसे सहजकविः आसीत्। तस्य 'चण्डीचरितम्' इति काव्ये 'स्वयं वीरगतिं प्राप्नुयाम्' इति प्रेरणावाक्यैः समाजं प्रेरितवान्। 'विचित्रनाटकम्' इति पुस्तके स्ववीरगाथां सूचितवान्।

**प्रतापः** – गुरुगोविन्दस्य अन्यवैशिष्ट्यानि कानि?

**शिक्षकः** – कबीरः गुरुनानकः सूरदासादयः भक्ताः आसन्। गुरुगोविन्दस्तु वीरभक्तः आसीत्। सः हिन्दूशक्तिं सङ्घटितवान्। सर्वे समानाः एकमेव भगवतः ज्योतिः सर्वेषु ज्वलति इति तस्य अचलः विश्वासः आसीत्। सज्जनानां संरक्षणाय, दुष्टानां विनाशाय 'खड्गं गृहीत्वा युद्धं कुरु' 'खड्गस्य जयोऽस्तु' इति निनादं कुर्वन् बहूनि युद्धानि कृतवान्। 1689 वर्षस्य एप्रिल् मासतः मृत्युपर्यन्तं शत्रून् भायितवान् तेषां हृदयेषु कम्पनं जनितवान्। हिन्दूधर्मञ्च संरक्षितवान्।

**विनीता** – तस्य मुक्तिः कदा अभवत्।

**शिक्षकः** – गुरुगोविन्दसिंहः 42 तमे वयसि 1708 तमे वर्षे अक्टोबरमासे सप्तमे दिनाङ्के महाराष्ट्रस्य 'नान्देड' प्रान्ते मुक्तिं प्राप्तवान्।

तस्य उद्घोषं स्मरामः

'वाहे गुरुजी का खालसा - वाहे गुरुजी की फतह'

(खालसा ईश्वरीयः भवति - ईश्वरस्य विजयः निश्चितः)

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| आबाल्यात् | = | बचपन से | आत्मविश्वासेन | = | आत्मविश्वास से |
| वर्धितुम् | = | बढ़ाने के लिए | कङ्कतिका-स्थापनं | = | कंघी रखना |
| विनाशाय | = | विनाश के लिए | मृत्युपर्यन्तम् | = | मृत्यु तक |
| भायितवान् | = | भयभित किया | संरक्षितवान् | = | संरक्षण किया |

## अभ्यासः

**1. एकपदेन उत्तरं लिखत–**

(क) सिक्खानां दशमः गुरुः कः आसीत्?

(ख) सिक्खधर्मप्रवर्तकः कः आसीत्?

(ग) गुरुगोविन्दसिंहस्य मातुः नाम किम्?

(घ) गुरुगोविन्दसिंहस्य मुक्तिः कुत्र अभवत्?

(ङ) ईश्वरीयदीक्षा का?

**2. एकवाक्येन उत्तरं लिखत–**

(क) सिक्खानां पञ्च बाह्यचिह्नानि कानि?

(ख) गुरुगोविन्दसिंहस्य जननं कदा अभवत्?

(ग) कुत्र धर्मः विकासं प्राप्ताः?

(घ) विदेशीयाः कीदृशाः आसन्?

(ङ) आचार्येण केषां कथाः श्राविताः?

**3. कोष्ठकपदानि उपयुज्य रिक्तस्थानानि पूरयत–**

(गुरुजी, आत्मविश्वासेन, खड्गं, भगवतः)

(क) एकमेव ............... ज्योतिः सर्वेषु ज्वलति।

(ख) गुरुगोविन्दसिंहः ............ कार्यं कृतवान्।

(ग) वाहे ........... की फतह।

(घ) ......... गृहीत्वा युद्धं कुरु।

**4. सम्बोधनं लिखत –**

| शब्दः | पुंल्लिङ्गे | स्त्रीलिङ्गे |
|---|---|---|
| आचार्य | हे आचार्य! | हे आचार्ये |
| आर्य | | |
| महोदय | | |
| अनुज | | |

**5. उचितं मेलनं कुरुत–**

| | (अ) | (ब) |
|---|---|---|
| (क) | प्रथमः गुरुः | वीरभक्तः |
| (ख) | दशमः गुरुः | कार्तिकशुक्लसप्तमी |
| (ग) | जननम् | गुरुतेगबहादुरः |
| (घ) | गुरुगोविन्दसिंहः | गुरुगोविन्दसिंहः |
| (ङ) | पितुः नाम | गुरुनानकः |

**6. क्रमशः स्थापयत–**

(क) गुरुगोविन्दसिंहः हिन्दूशक्तिं सङ्घटितवान्।

(ख) गुरुगोविन्दसिंहस्य मुक्तिः 1708 तमे वर्षे अभवत्।

(ग) माता गुजरी पिता तेगबहादुरः च आस्ताम्।

(घ) गुरुनानकः सिक्खधर्मप्रवर्तकः आसीत्।

(ङ) गुरुगोविन्दसिंहस्य जननम् कार्तिकशुक्लसप्तम्याम् अभवत्।

**योग्यताविस्तारः –**

- आचार्यस्य सहयोगेन सिक्खधर्मप्रवर्तकस्य गुरुनानकस्य विषये जानन्तु।

*वन्दे महापुरुष ते चरणारविन्दम्।*